त्करणानां मयोदितम् NāṭyaS'ā. 4. 38; व्यावृत्तपरिवृत्तस्तु स एव तु करो यदा। अञ्चितो नासिकाग्रे तु तदञ्चितमुदाहृतम् NāṭyaS'ā. 4. 84; योऽर्धस्वस्तिककरणे करिहस्त उक्तः स एव व्यावर्तितकरणेन यदा नासाक्षेत्रे अलपल्लवाकृतित्वादञ्चितोदञ्चित-सारणानुकारि तदञ्चितम् AbhinBhā. i. 108. 19 (*on* 4. 84); स्यात्क्रिया करपादा-देर्विलासेनात्रुटद्रसा। करणं नृत्तकरणं भीमवद्भीमसेनवत्। प्रभेदान्करणस्यास्य ब्रूमहे भरतोदितान्। तलपुष्पपुटम् … स्वस्तिकमञ्चितम् SaṁgīRa. iv. 192. 3 (7. 551); उक्तोऽर्धस्वस्तिके हस्तो दक्षिणो यः स एव चेत्। व्यावृत्त्या परिवृत्त्या च नासादेशेऽलपद्मवत्। अञ्चिताङ्ग्र्यनुसारी स्यात् तदञ्चितमुदाहृतम् NṛttaRa. 4. 41; **iii** name of an Utplutikaraṇa (symmetric placement of the various lower limbs of the body) in dancing वदत्युत्प्लुतिपूर्वाणि करणानि हरप्रियः। अञ्चितं चैकचरणाञ्चितं स्याद्द्वैरवाञ्चितम् SaṁgīRa. iv. 240. 6 (7. 750); समपादस्थितो यत्र कृतोत्तानोत्प्लुतिर्दिवि। विवृतः पूर्ववत्तिष्ठेत् तदञ्चितमुदीरितम् NṛttaRa. 5. 48; विधाय समपादाख्यं स्थानमुत्तानितो यदा। उत्पतेदञ्चितं प्रोक्तं तदा करणवेदिभिः Nṛtyā. 1302; **iv** a particular mode of kissing समं पीडितमञ्चितं मृदु शेषाङ्गेषु चुम्बनं स्थानविशेषयोगात् इति चुम्बनविशेषाः KāmSū. 112. 15 ( 2. 3 ); ललाटचिबुकयोः कक्षापर्यन्ते चुम्बनमञ्चितम् JayaMa. 112. 21 (*on* 2. 3); स्थान-विशेषाच्छेशे( ? षे ) चुम्बनदेशे चतुर्धा तत्। समपीडितमृदुभेदादञ्चितसहितात् प्रकीर्तितान्वर्थात्। इति विस्तरतः कथितं चुम्बनमधरस्य चान्यस्य KandaCū. ii. 3. 25; **v** a particular type of look (indicating amorousness) पर्यायेण चलत्तारं मन्दं मन्दमथाञ्चितम् BhāvPra.( S'ā. ) 120. 3(5); S'abdaRa.( Vā. ) 1930; **vi** one of the thirteen aspects of the play called Vīthi अञ्चितं यथा। नानार्थानामुपक्षेपोऽञ्चितं श्लिष्टानि यत्र पदानि तद्वाञ्चितम् NāṭaLa-RaK. 3013; **vii** movement or gait (of a horse) भाति स मूर्तिः … चतुराञ्चितानाम्। …तुरङ्गमाणाम् HarVi. 40. 36.

**अञ्चितकक्ष्य** ( añcita–kakṣya ) *adj.* having stretched straps अञ्चितकक्ष्ये पणवे रेफः सोऽर्धे तु हस्योर्ध्वे ग्रहे। कार्या मयूरककरा(:) सूक्ष्मौघास्तथा प्रहारा त्रिधातव्याः NāṭyaS'ā. 34. 77.

**अञ्चितकञ्चुका** ( añcita–kañcukā ) *adj.* (*f.*) whose slough is covered कबरीभुजगी तथामरीभिस्तगरैरञ्चितकञ्चुकेव चक्रे S'rīKaC. 8. 34.

**अञ्चितकण्टकाभ** ( añcitakaṇṭakābha ) *adj.* having the beauty of studded thorns (in the form of horripilation) अम्ब स्मरप्रतिभटस्य वपुर्मनोज्ञ-मम्भोजकाननमिवाञ्चितकण्टकाभम्। भृङ्गीव चुम्बति … त्वदपाङ्गमाला MūkaPañ. 1. 22.

**अञ्चितकन्धर** ( añcita–kandhara ) *adj.* with curved neck दूरादञ्चित-कन्धरः … कोकूयते कुक्कुटः SūktiMu. 82. 7.

**अञ्चितकर** ( añcita–kara ) *adj.* with the hand pressed against अनङ्गा-गारचुचूलिकाञ्चितकराः कुर्युः स्त्रियं विह्वलाम् RatiRaha. 2. 17.

**अञ्चितकल** ( añcita–kala ) *adj.* chirping sweet notes सा … नैवोन्मुञ्चति वाचमञ्चितकला विघ्नन्ति मां कोकिलाः SubhāRaK. 23. 27.

**अञ्चितकाञ्चनाभ** ( añcita–kāñcanābha ) *adj.* possessed of the (beautiful) lustre of gold अञ्चितकाञ्चनाभम्…यस्य वपुः ( तस्य…निजनिबन्धनमद्य बध्नाति बुधहृदयम् ) SubhaDha. 1. 2.

**अञ्चितकुण्डल** ( añcita–kuṇḍala ) *adj.* having the earrings shining with जय…हारकलापरुचाञ्चितकुण्डल…वीर StavMā. 146. 5.

**अञ्चितकुश** ( añcita–kuśa ) *adj.* having (a ring of) twisted kuśa-grass पञ्चाङ्गमञ्चितकुशेन करेण धृत्वा…तारादि वाचयति Mukundā. 125.

**अञ्चितक्रियाविष्ट** ( añcitakriyāviṣṭa ) *adj.* which has formed the *añcita* posture करिहस्तः … यदा त्रिपताकोऽसावञ्चितक्रियाविष्टो डोलापादचारी तदा गजक्रीडितकम् AbhinBhā. i. 124. 17 (*on* 4. 129)

**अञ्चितगजयुत** (añcitagaja–yuta) *adj.* **1** having a decorated elephant अथ वर्णाक्षेपेण श्लेषप्रकारान्तरमाह…अञ्चितगजयुतः पक्षे अङ्गजः KāvyKaVṛ. 52. 5 (3. 1); **2** (word) containing the word *gaja* to which *aṁ* is added (initially) KāvyKaVṛ. 52. 5 (3. 1)

**अञ्चितगामिन्** ( añcitagām–in ) *adj.* who has an easy or undisturbed gait अञ्चितं गच्छतीति … गमनस्याव्याकुलत्वमित्यर्थः। तथा च नागाश्वाञ्चितगामिन इति प्रयोगो दृश्यते Pradī. vii. 122. 14 (*on* viii. 2. 48)

**अञ्चितग्रीवा** ( añcita–grīvā ) *adj.* (*f.*) having a bent neck ( स्त्रियः … नानाशीलाः ) स्थूलशीर्षाञ्चितग्रीवा …। ज्ञेया मकरसत्त्वा च क्रूरा NāṭyaS'ā. 22. 130.

**अञ्चितचक्षुस्** ( añcita–cakṣus ) *adj.* having contracted eyes ( कुञ्जरस्य ) किञ्चिदञ्चितचक्षुषः। स्विद्यदाभोगगण्डस्य कः शोभां वर्णितुं क्षमः MahāBhā. xii. 276*(3); ViṣṇuDhaP. ii. 48. 8.

**अञ्चितचर्चम्** ( añcita–carcam ) *adv.* repeatedly करिवदनोऽञ्चितचर्चमर्च-ताम्। …व्यतनुत विघ्नहतिं धनुष्मताम् S'rīKaC. 23. 16.

**अञ्चितचाटु** ( añcita–cāṭu ) *adj.* adopting flattery स किलाञ्चितचाटुरान-यत् सुमुखीं तामनुकूलवृत्तिताम् NavaSāC. 12. 68.

**अञ्चितचुम्बन** ( añcita–cumbana ) *n.* the bent kiss ललाटादिस्थानेषु कर्मभेदात्समचुम्बनम् … अञ्चितचुम्बनम् … चेति चतुर्विधम्। … ललाटचिबुकयोः कक्षापर्यन्ते चुम्बनमञ्चितम् JayaMa. 112. 18 (*on* 2. 3)

**अञ्चितजङ्घ** ( añcita–jaṅgha ) *adj.* in which the shanks are bent किञ्चिदञ्चितजङ्घं च…। वैष्णवस्थानमेतद्धि NāṭyaS'ā. 10. 53; स्वभावसंश्रितः पादस्त्र्यंशः पक्षगतोऽपरः। किञ्चिदञ्चितजङ्घश्च वैष्णवं स्थानमुच्यते ViṣṇuDhaP. iii. 23. 2.

**अञ्चितजानुक** ( añcitajānu–ka ) *adj.* having bent knees पृष्ठप्रसारितः पादः किञ्चिदञ्चितजानुकम्। यत्र प्रसारितौ बाहू तत्स्याद् गृध्रावलीनकम् NāṭyaS'ā. 4. 135.

**अञ्चिततनु** ( añcita–tanu ) *adj.* whose body is bristling with (horripilation) यदन्योन्यप्रेमप्रवणयुवतीमन्मथकथासमारम्भे स्तम्भीभवति पुलकैरञ्चिततनुः। तथा मन्ये धन्यं परमसुरतब्रह्मनिरतं कुरङ्गाक्षी दीक्षागुरुमकृत कश्चित्सुकृतिनम् SubhāRaK. 15. 41; SaduktiKa. 71. 34.

**अञ्चिततम** ( añcita–tama ) *adj.* most honoured or distinguished अस्य श्रीजयसिंहदेवनृपतेः श्रेयोऽर्णवं प्रोगयन्नूर्णः शीतमरीचिरञ्चिततमैरभ्यर्चितः सद्गुणैः EI. xxi. 96. 41.

**अञ्चिततमोमणि** ( añcita–tamomaṇi ) *m.* beautiful dark gem, jet केचिदस्य किरणास्सविलम्बाः। शार्वरैर्जगृहिरे किल हस्तग्राहमञ्चिततमोमणिदम्भात् Acyutarā. 8. 28.

**अञ्चिततर** ( añcita–tara ) *adj.* extremely beautiful अङ्गानि … रोमाञ्च-मञ्चिततरं बिभरांबभूवुः Kirātā. 15. 53 ( comm. अतिरुचिरतरम् ); आभाति कर्क-शबलं सुरराजसैन्यमश्वीयमञ्चिततरं च रसत्खलीनम् HarVi. 39. 40.

**अञ्चिततल** ( añcita–tala ) *adj.* with bent palms प्रकुर्यादञ्चिततलौ हस्तौ तलविलासिते NāṭyaS'ā. 4. 117; तेनैवोर्ध्वगतेन पादेन सहाञ्चिततलो वा श्लिष्टतल-त्वात्कर्तव्यः AbhinBhā. i. 122. 15 (*on* 4. 117)

**अञ्चिततारका** ( añcita–tārakā ) *adj.* (*f.*) having contracted pupils कुञ्चिताकुञ्चिता दृष्टिः किञ्चिदञ्चिततारका ViṣṇuDhaP. iii. 25. 20; यथाह भरतः– आघूर्णमानमध्या या क्षामा चाञ्चिततारका। दृष्टिर्विकसितापाङ्गा मदिरा तरुणे मदे VyaktiVi. 81. 27.

**अञ्चितत्रिनयन** ( añcita–trinayana ) *adj.* possessing three eyes अञ्चित-त्रिनयनं रक्ताभमार्ग्निं भजे S'āraTi. 14. 95.

**अञ्चितदक्षिणोरु** ( añcita–dakṣiṇoru ) *adj.* who has contracted his right thigh उदञ्चिताक्षोऽञ्चितदक्षिणोरुः। ताँल्लक्ष्मणः … जघान Bhaṭṭi. 2. 31 ( JayaMañ. न चात्र पूजा गम्यते किंतु गतिविशेष एव )

**अञ्चितदल** ( añcita–dala ) *adj.* (*f.* –ā) petals of which are curved (or closed) विरिञ्चनिर्मुक्तमञ्चितदलं हरिनाभिपद्मम्। उत्खाय यः …विनिधातुमैच्छत् HarVi. 16. 49; संचारयाञ्चितदलासु च चञ्चरीकान्। …कुमुद्वतीषु HarVi. 20. 82.

**अञ्चितदृश्** ( añcita–dṛś ) *adj.* having beautiful eyes गण्डभित्तिषु पुरा सदृशीषु व्याञ्जि नाञ्चितदृशां प्रतिमेन्दुः S'iśuVa. 10. 31 (comm. सुदृशाम्); BhikṣāKā. 2. 6.

**अञ्चितदोहदत्व** ( añcitadohada–tva ) *n.* **1** the state of having a noble desire प्राप्तामधिप्रधनमञ्चितदोहदत्वं सेनां विधाय सुरभर्तुरनुत्तमाङ्गाम्। प्राज्यं यशः पिबतु वो भटचक्रवालमव्याहतं पय इवेन्दुमरीचिगौरम् HarVi. 45. 34; **2** the state of having good milking, HarVi. 45. 34.

**अञ्चितधी** ( añcita–dhī ) *adj.* having a distinguished intellect दर्शितावयवपञ्चकम् … वाक्यमञ्चितधियः प्रयुञ्जते HarVi. 14. 27; हीर रङ्गनृपतिः… अञ्चितधीः … चञ्चच्छक्तिमनीनयद्युधि रिपुं यद् दुर्जयं पञ्चताम् ĀnandRa. 8. 7.

**अञ्चितपक्ष्माक्ष** ( añcitapakṣmākṣa ) *adj.* having eyes with curved or beautiful eyelashes अन्यदञ्चितपक्ष्मान्तं ( v. l. पक्ष्माक्षम् ) दक्षिणं निःसृतं मुखम् MahāBhā. i. 203. 23.

**अञ्चितपक्ष्माग्र** ( añcita–pakṣmāgra ) *adj.* having curved or beautiful eyelashes अन्यदञ्चितपक्ष्मान्तं ( v. l. पक्ष्माग्रम् ) दक्षिणं निःसृतं मुखम् MahāBhā. i. 203. 23.

**अञ्चितपक्ष्मान्त** ( añcita–pakṣmānta ) *adj.* having beautiful or curved eye-lashes अन्यदञ्चितपक्ष्मान्तं दक्षिणं निःसृतं मुखम् MahāBhā. i. 203. 23.

**अञ्चितपञ्चकूर** ( añcita–pañcakūra ) *adj.* mixed or decorated with *pañcakūra* (five types of cooked grains) कुशप्रसूनाक्षतवारिहव्यैस्त्रिशः किरेत्… अञ्चितपञ्चकूरैः TantrSa. 1. 72.

**अञ्चितपञ्चमा** ( añcita–pañcamā ) *adj.* (*f.*) singing (*lit.* honouring) the fifth note of the gamut माकन्दवाटीषु मधुव्रतानां कुलं वितेने कलकूजि-तानि। पिकावलेरञ्चितपञ्चमायास्तानार्पणायेव धृताभिलाषम् YātrāPra. 3. 16.

**अञ्चितपत्त्र** ( añcita–pattra ) *m.* a kind of a lotus with curved leaves